# Shri Nrisimha Ashtakam 5

# શ્રીનૃસિંહાષ્ટકમ્ ૫

## Document Information

Text title : Shri Nrisimha Ashtakam 5

File name : nRRisiMhAShTakam5.itx

Category : vishhnu, dashAvatAra, vAsudevAnanda-sarasvatI, aShTaka

Location : doc_vishhnu

Author : vAsudevAnandasarasvatI TembesvAmi

Description-comments : From stotrAdisangraha

Latest update : May 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 12, 2021

*sanskritdocuments.org*

# Shri Nrisimha Ashtakam 5

# શ્રીનૃસિંહાષ્ટકમ્ ૫

યં ધ્યાયસે સ ક્વ તવાસ્તિ દેવ ઇત્યુક્ત ઊચે પિતરં સશસ્ત્રમ્ ।
પ્રહ્લાદ આસ્તેઽખિલગો હરિઃ સ લક્ષ્મીનૃસિંહોઽવતુ માં સમન્તાત્ ॥ ૧॥

તદા પદાતાડયદાદિદૈત્યઃ સ્તમ્ભો તતોઽહ્નાય ઘુરુરુશબ્દમ્ ।
ચકાર યો લોકભયઙ્કરં સ લક્ષ્મીનૃસિંહોઽવતુ માં સમન્તાત્ ॥ ૨॥

સ્તમ્ભં વિનિર્ભિદ્ય વિનિર્ગતો યો ભયઙ્કરાકાર ઉદસ્તમેઘઃ ।
જટાનિપાતૈઃ સ ચ તુઙ્ગકર્ણો લક્ષ્મીનૃસિંહોઽવતુ માં સમન્તાત્ ॥ ૩॥

પઞ્ચાનનાસ્યો મનુજાકૃતિર્યો ભયઙ્કરસ્તીક્ષ્ણનખાયુધોઽરિમ્ ।
ધૃત્વા નિજોર્વોર્વિદદાર સોઽસૌ લક્ષ્મીનૃસિંહોઽવતુ માં સમન્તાત્ ॥ ૪॥

વરપ્રદોક્તેરવિરોધતોઽરિં જઘાન ભૃત્યોક્તમૃતં હિ કુર્વન્ ।
સ્રગ્વત્તદન્ત્રં નિદધૌ સ્વકણ્ઠે લક્ષ્મીનૃસિંહોઽવતુ માં સમન્તાત્ ॥ ૫॥

વિચિત્રદેહોઽપિ વિચિત્રકર્મા વિચિત્રશક્તિઃ સ ચ કેસરીહ ।
પાપં ચ તાપં વિનિવાર્ય દુઃખં લક્ષ્મીનૃસિંહોઽવતુ માં સમન્તાત્ ॥ ૬॥

પ્રહ્લાદઃ કૃતકૃત્યોઽભૂદ્યત્કૃપાલેશતોઽમરાઃ ।
નિષ્કણ્ટકં સ્વધામાપુઃ શ્રીનૃસિંહઃ સ પાતિ મામ્ ॥ ૭॥

દંષ્ટ્રાકરાલવદનો રિપૂણાં ભયકૃદ્ભયમ્ ।
ઇષ્ટદો હરતિ સ્વસ્ય વાસુદેવઃ સ પાતુ મામ્ ॥ ૮॥

ઇતિ શ્રીવાસુદેવાનન્દસરસ્વતીવિરચિતં શ્રીલક્ષ્મીનૃસિહાષ્ટકં સમાપ્તમ્ ।

Please send corrections to *sanskrit@cheerful.com*